# एकादशः पाठः

## गणतन्त्रदिवस-समारोहः



**प्रभाकरः-** मित्र जैकब! श्वः गणतन्त्रदिवसस्य समारोहः भविष्यति। तस्य दर्शनाय वयं गमिष्यामः। सलीमः ह्यः माम् अवदत् यत् सः अपि तत्र गमिष्यति। किं त्वमपि तत्र चलिष्यसि?

**जैकबः-**मित्र! गणतन्त्रदिवसस्य समारोहः किमर्थं भवति?

**प्रभाकरः-** अहो! किं त्वं न जानासि यत् प्रथमगणतन्त्रदिवसाद् एव स्वतन्त्रभारतस्य स्वकीयं नवीनं संविधानम् आरब्धमासीत्।

**जैकबः-** गणतन्त्रदिवसस्य आरम्भः कदा अभवत्?

**प्रभाकरः-** अद्यैव तु अस्माकम् अध्यापकः गणतन्त्रविषये अवदत् यत् 26.01.1950 ईसवीये वर्षे प्रथम-गणतन्त्रदिवसस्य समारोहः अभवत्।

**जैकबः-** अयं समारोहः कुत्र भविष्यति, तथा च तत्र किं भविष्यति ?

**प्रभाकरः-** अयं समारोहः सम्पूर्णे देशे आयोजितो भविष्यति। विद्यालयेषु, यन्त्रालयेषु, कार्यालयेषु च ध्वजारोहणं भवति। विद्यालयेषु बालकाः क्रीडाङ्गणेषु सोत्साहं खेलिष्यन्ति। ततः शिक्षकाः सर्वेभ्यः मोदकं वितरिष्यन्ति।

**जैकबः-**भारतस्य राजधान्यां दिल्लीनगर्यां श्वः किं किं भविष्यति?

**प्रभाकरः-** तत्र भारतद्वारम् इत् िस्थाने राष्ट्रपतिः राष्ट्रं सम्बोधयिष्यति। तदनन्तरं भारतीय-सैनिकाः विभिन्नेषु समूहेषु तस्य सम्मुखम् आगत्य तस्याभिनन्दनं करिष्यन्ति।

**जैकबः-**गणतन्त्रदिवस-समारोहे अन्यत् किं किं भवति?

**प्रभाकरः-** विभिन्नेभ्यः राज्येभ्यः जनाः अस्य समारोहस्य दर्शनाय तत्र गच्छन्ति। स्व-स्वराज्यस्य कलाकृतीरपि प्रदर्शयितुं तत्र नयन्ति।

**जैकबः-** किं दिल्लीवासिनः एव भारतद्वारं यान्ति?

**प्रभाकरः-** नैव, नैव, सर्वेऽपि भारतीयाः सम्मिलिताः भवितुं शक्नुवन्ति। एषः समारोहः सम्पूर्णस्य राष्ट्रस्यास्ति।

**जैकबः-** तर्हि अहमपि तत्र सम्मिलितः भविष्यामि। स्वमित्रं हमीदमपि तत्र नेष्यामि।

**प्रभाकरः-** शोभनम्, अतिशोभनम्।

शब्दार्थः

**श्वः**=कल (आने वाला) **ह्यः**=कल(बीता हुआ) **स्वकीयम्**=अपना **आरब्धम्** = प्रारम्भ हुआ **अद्यैव**=आज ही **कुत्र**=कहाँ **भविष्यति**=होगा **यन्त्रालयेषु**=कारखानों मे **क्रीडाङ्गणेषु**=खेल के मैदान में **भारतद्वारस्य**=भारतद्वार(इंडिया गेट) के **सम्बोधयिष्यति**=सम्बोधित करेंगे **शोभनम्**=सुन्दर **नेष्यन्ति**=ले जाएंगे

अभ्यासः

**1. उच्चारणं कुरुत पुस्तिकायां च लिखत-**

आरब्धमासीत् , अद्यैव,तस्याभिनन्दनम्, कलाकृतीरपि।

**2. एकपदेन उत्तरत -**

(क) गणतन्त्रदिवसे समारोहः कदा भवति ?

(ख) गणतन्त्रदिवसे कः राष्ट्रं सम्बोधयति ?

(ग) अस्माकं देशस्य राजधानी का अस्ति ?

**3. पूर्णवाक्येन उत्तरत -**

(क) गणतन्त्रदिवसस्य समारोहः किमर्थं भवति ?

(ख) गणतन्त्र-दिवससमारोहस्य आरम्भः कदा अभवत् ?

(ग) गणतन्त्र-दिवसे किं किं भवति ?

**4. मञ्जूषातः उचितपदानि चित्वा वाक्यानि पूरयत-**

*श्वः, ह्यः, अधुना, अद्य*

**यथा**-अहम् ...**ह्यः**..गीताम् अपठम्।

(क) त्वम् ...................... कुत्र गमिष्यसि ?

(ख) .................... गणतन्त्र-दिवसस्य उत्सवः अस्ति।

(ग) ....................... देशः स्वतन्त्रः अस्ति।

**विशेषः**

भविष्यत् काल की क्रिया बनाने के लिए धातु के 'लृट्' लकार के रूपों का प्रयोग किया जाता है ,

एकवचनम् द्विवचनम् बहुवचनम्

.सः गमिष्यति तौ गमिष्यतः ते गमिष्यन्ति

(वह जायेगा) (वे दोनों जायेंगे) (वे सब जायेंगे)

त्वं गमिष्यसि युवां गमिष्यथः यूयं गमिष्यथ

(तुम जाओगे) (तुम दोनों जाओगे) (तुम सब जाओगे)

अहं गमिष्यामि आवां गमिष्यावः वयं गमिष्यामः

(मैं जाऊँगा) (हम दोनों जायेंगे) (हम सब जायेंगे)

ऊपर ध्यान से देखें तो ज्ञात होता है कि 'गम्' धातु के लृट् लकार के प्रथम पुरुष के एकवचन, द्विवचन और बहुवचन में क्रमशः गम्-**इष्यति**=गमिष्यति, **गम्-इष्यतः**=गमिष्यतः, **गम्-इष्यन्ति**=गमिष्यन्ति आदि प्रत्ययों को जोड़ते हैं। इसी प्रकार मध्यम तथा उत्तम पुरुष के रूप में भी अन्य प्रत्यय जुड़ते हैं, यथा-

एकवचनम् द्विवचनम् बहुवचनम्

गम्-इष्यसि=गमिष्यसि गम्-इष्यथः=गमिष्यथः गम्-इष्यथ=गमिष्यथ

एकवचनम् द्विवचनम् बहुवचनम्

गम्-इष्यामि=गमिष्यामि गम्-इष्यावः=गमिष्यावः गम्-इष्यामः=गमिष्यामः

**5. अधोलिखित क्रियापदानां धातुं लकारं पुरुषं वचनं च लिखत-**

क्रियापदम्, धातुः, लकारः, पुरुषः, वचनम्।

यथा-गमिष्यति गम् लृट्लकारः प्रथम-पुरुषः एकवचनम्

भविष्यति ...... .................. ............. ................

पठिष्यति ...... .................. ............. ................ नेष्यन्ति ...... .................. ............. ................

**6. चित्र-निर्माणं कुरुत -**

राष्ट्रियध्वजः, राष्ट्रियपक्षी, राष्ट्रियपुष्पम्।

**7-अधोलिखित पदानि प्रयुज्य वाक्यरचनां कुरुत-**

यथा-समारोहः - श्वः गणतंत्रदिवसस्य समारोहः भविष्यति।

अध्यापकः, ध्वजारोहणम्, भारतीयाः

जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।